# ॥ हरिहरपुत्राष्टोत्तरशतनामस्तोत्रम् ॥

महाशास्ता महादेवो महादेवसुतोऽव्ययः।
लोककर्ता लोकभर्ता लोकहन्ता परात्परः॥ १॥

त्रिलोकरक्षको धन्वी तपस्वी भूतसैन्यकः।
मन्त्रवेत्ता महावेत्ता मारुतो जगदीश्वरः॥ २॥

लोकाध्यक्षोऽग्रणीः श्रीमान् अप्रमेयपराक्रमः।
सिंहारूढो गजारूढो हयारूढो महेश्वरः॥ ३॥

नानाशास्त्रधरोऽनर्घो नानाविद्याविशारदः।
नानारूपधरो वीरो नानाप्राणिनिषेवितः॥ ४॥

भूतेशः पूजितो भृत्यो भुजङ्गाभरणोत्तमः।
इक्षुधन्वी पुष्पबाणो महारूपो महाप्रभुः॥ ५॥

मायादेवीसुतो मान्यो महानीतो महागुणः।
महाशैवो महारुद्रो वैष्णवो विष्णुपूजकः॥ ६॥

विघ्नेशो वीरभद्रेशो भैरवो षण्मुखध्रुवः।
मेरुशृङ्गसमासीनो मुनिसङ्घनिषेवितः॥ ७॥

देवो भद्रो जगन्नाथो गणनाथो गणेश्वरः।
महायोगी महामायी महाज्ञानी महाधिपः॥ ८॥

देवशास्ता भूतशास्ता भीमहासपराक्रमः।
नागहारश्च नागेशो व्योमकेशः सनातनः॥ ९॥

कालज्ञो निर्गुणो नित्यो नित्यतृप्तो निराश्रयः।
लोकाश्रयो गुणाधीशश्चतुःषष्टिकलामयः॥ १०॥

ऋग्यजुःसामरूपी च मल्लकासुरभञ्जनः।
त्रिमूर्तिर्दैत्यमथनो प्रकृतिः पुरुषोत्तमः॥ ११॥

सुगुणश्च महाज्ञानी कामदः कमलेक्षणः।
कल्पवृक्षो महावृक्षो विद्यावृक्षो विभूतिदः॥ १२॥

संसारतापविच्छेत्ता पशुलोकभयङ्करः।
रोगहन्ता प्राणदाता परगर्वविभञ्जनः॥ १३॥

सर्वशास्त्रार्थतत्त्वज्ञो नीतिमान् पापभञ्जनः।
पुष्कलापूर्णसंयुक्तो परमात्मा सतां गतिः॥ १४॥

अनन्तादित्यसङ्काशः सुब्रह्मण्यानुजो बली।
भक्तानुकम्पी देवेशो भगवान् भक्तवत्सलः॥ १५॥

॥ इति श्री-हरिहरपुत्राष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Hariharaputra_Ashtottara_Shatanama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits